# ॥ मूकसारः ॥

## ॥ १-आर्याशतके ॥

[कारण-पर-चिद्रूपा काञ्चीपुर-सीम्नि कामपीठगता।
काचन विहरति करुणा काश्मीर-स्तबक-कोमलाङ्गलता]॥ १ ॥ १-१

कुण्डलि कुमारि कुटिले चण्डि चराचर-सवित्रि चामुण्डे।
गुणिनि गुहारिणि गुह्ये गुरुमूर्ते त्वां नमामि कामाक्षि॥ २ ॥ १-४६

अभिदाकृतिर्भिदाकृतिरचिदाकृतिरपि चिदाकृतिर्मातः।
अनहन्ता त्वमहन्ता भ्रमयसि कामाक्षि शाश्वती विश्वम्॥ ३ ॥ १-४७

काम-परिपन्थि-कामिनि कामेश्वरि काम-पीठ-मध्य-गते।
काम-दुघा भव कमले काम-कले कामकोटि कामाक्षि॥ ४ ॥ १-४८

लीये पुर-हर-जाये माये तव तरुण-पल्लव-च्छाये।
चरणे चन्द्रा-भरणे काञ्ची-शरणे नतार्ति-संहरणे॥ ५ ॥ १-७२

स्मर-मथन-वरण-लोला मन्मथ-हेला-विलास-मणि-शाला।
कनक-रुचि-चौर्य-शीला त्वमम्ब बाला कराब्ज-धृत-माला॥ ६ ॥ १-७३

अन्तरपि बहिरपि त्वं जन्तुततेरन्तकान्तकृदहन्ते।
चिन्तितसन्तानवतां सन्ततमपि तन्तनीषि महिमानम्॥ ७ ॥ १-९८

[जय जय जगदम्ब शिवे
जय जय कामाक्षि जय जयाद्रिसुते।
जय जय महेशदयिते
जय जय चिद्गगनकौमुदीधारे]॥ ८ ॥ १-१००

## ॥ २-पादारविन्दशतके ॥

जपालक्ष्मीशोणो जनितपरमज्ञाननलिनी-
विकासव्यासङ्गो विफलितजगज्जाड्यगरिमा।
मनःपूर्वाद्रिं मे तिलकयतु कामाक्षि तरसा
तमस्काण्डद्रोही तव चरणपाथोजरमणः॥ ९ ॥ २-१७

गिरां दूरौ चोरौ जडिमतिमिराणां कृतजगत्
परित्राणौ शोणौ मुनिहृदयलीलैकनिपुणौ।
नखैः स्मेरौ सारौ निगमवचसां खण्डितभव-
ग्रहोन्मादौ पादौ तव जननि कामाक्षि कलये॥ १० ॥ २-४४

भवाम्भोधौ नौकां जडिमविपिने पावकशिखाम्
अमर्त्येन्द्रादीनामधिमुकुटमुत्तंसकलिकाम् ।
जगत्तापे ज्योत्स्नामकृतकवचःपञ्जरपुटे
शुकस्त्रीं कामाक्ष्या मनसि कलये पादयुगलीम्॥ ११ ॥ २-४९

कवित्वश्रीमिश्रीकरणनिपुणौ रक्षणचणौ
विपन्नानां श्रीमन्नलिनमसृणौ शोणकिरणौ।
मुनीन्द्राणामन्तःकरणशरणौ मन्दसरणौ
मनोज्ञौ कामाक्ष्या दुरितहरणौ नौमि चरणौ॥ १२ ॥ २-७३

परस्मात्सर्वस्मादपि च परयोर्मुक्तिकरयोः
नखश्रीभिर्ज्योत्स्नाकलिततुलयोस्ताम्रतलयोः।
निलीये कामाक्ष्या निगमनुतयोर्नाकिनतयोः
निरस्तप्रोन्मीलन्नलिनमदयोरेव पदयोः॥ १३ ॥ २-७४

रणन्मञ्जीराभ्यां ललितगमनाभ्यां सुकृतिनाम्
मनोवास्तव्याभ्यां मथिततिमिराभ्यां नखरुचा।
निधेयाभ्यां पत्या निजशिरसि कामाक्षि सततम्
नमस्ते पादाभ्यां नलिनमृदुलाभ्यां गिरिसुते॥ १४ ॥ २-९६

यशः सूते मातर्मधुरकवितां पक्ष्मलयते
श्रियं दत्ते चित्ते कमपि परिपाकं प्रथयते।
सतां पाशग्रन्थिं शिथिलयति किं किं न कुरुते
प्रपन्ने कामाक्ष्याः प्रणतिपरिपाटी चरणयोः॥ १५ ॥ २-९९

मनीषां माहेन्द्रीं ककुभमिव ते कामपि दशाम्
प्रधत्ते कामाक्ष्याश्चरणतरुणादित्यकिरणः।
यदीये सम्पर्के धृतरसमरन्दा कवयताम्
परीपाकं धत्ते परिमलवती सूक्तिनलिनी॥ १६ ॥ २-१००

## ॥ ३-स्तुतिशतके ॥

[श्यामा काचन चन्द्रिका त्रिभुवने पुण्यात्मनामानने
सीमाशून्यकवित्ववर्षजननी या काऽपि कादम्बिनी।
माराराातिमनोविमोहनविधौ काचित्तमःकन्दली
कामाक्ष्याः करुणाकटाक्षलहरी कामाय मे कल्पताम्]॥ १७॥ ३-६

राकाचन्द्रसमानकान्तिवदना नाकाधिराजस्तुता
मूकानामपि कुर्वती सुरधुनीनीकाशवाग्वैभवम्।
श्रीकाञ्चीनगरीविहाररसिका शोकापहन्त्री सताम्
एका पुण्यपरम्परा पशुपतेराकारिणी राजते॥ १८॥ ३-११

जाता शीतल-शैलतः सुकृतिनां दृश्या परं देहिनां
लोकानां क्षण-मात्र-संस्मरणतः सन्ताप-विच्छेदिनी।
आश्चर्यं बहु खेलनं वितनुते नैश्चल्य-माबिभ्रती
कम्पायास्तट-सीम्नि काऽपि तटिनी कारुण्य-पाथोमयी॥ १९॥ ३-१२

वरीवर्तु स्थेमा त्वयि मम गिरां देवि मनसो
नरीनर्तु प्रौढा वदनकमले वाक्यलहरी।
चरीचर्तु प्रज्ञाजननि जडिमानः परजने
सरीसर्तु स्वैरं जननि मयि कामाक्षि करुणा॥ २०॥ ३-४८

परा विद्या हृद्याश्रितमदनविद्या मरकत-
प्रभानीला लीलापरवशितशूलायुधमनाः।
तमःपूरं दूरं चरणनतपौरन्दरपुरी-
मृगाक्षी कामाक्षी कमलतरलाक्षी नयतु मे॥ २१॥ ३-५६

यस्या वाटी हृदयकमलं कौसुमी योगभाजाम्
यस्याः पीठी सततशिशिरा शीकरैर्माकरन्दैः।
यस्याः पेटी श्रुतिपरिचलन्मौलिरत्नस्य काञ्ची
सा मे सोमाभरणमहिषी साधयेत्काङ्क्षितानि॥ २२॥ ३-७७

परामृतझरीप्लुता जयति नित्यमन्तश्चरी
भुवामपि बहिश्चरी परमसंविदेकात्मिका।
महद्भिरपरोक्षिता सततमेव काञ्चीपुरे
ममान्वहमहम्मतिर्मनसि भातु माहेश्वरी॥ २३॥ ३-९०

चराचरजगन्मयीं सकलहृन्मयीं चिन्मयीम्
गुणत्रयमयीं जगत्त्रयमयीं त्रिधामामयीम्।
परापरमयीं सदा दशदिशां निशाहर्मयीम्
परां सततसन्मयीं मनसि चिन्मयीं शीलये॥ २४॥ ३-९७

भुवनजननि भूषाभूतचन्द्रे नमस्ते
कलुषशमनि कम्पातीरगेहे नमस्ते।
निखिलनिगमवेद्ये नित्यरूपे नमस्ते
परशिवमयि पाशच्छेदहस्ते नमस्ते॥ २५॥ ३-९९

समरविजयकोटी साधकानन्दधाटी
मृदुगुणपरिपेटी मुख्यकादम्बवाटी।
मुनिनुतपरिपाटी मोहिताजाण्डकोटी
परमशिववधूटी पातु मां कामकोटी॥ २६ ॥ ३-१०१

## ॥ ४-कटाक्षशतके ॥

मातर्जयन्ति ममता-ग्रह-मोक्षणानि
माहेन्द्र-नील-रुचि-शिक्षण-दक्षिणानि।
कामाक्षि कल्पित-जगत्त्रय-रक्षणानि
त्वद्वीक्षणानि वरदान-विचक्षणानि॥ २७ ॥ ४-२

नीलोऽपि रागमधिकं जनयन् पुरारेः
लोलोऽपि भक्तिमधिकां दृढयन्नराणाम्।
वक्रोऽपि देवि नमतां समतां वितन्वन्
कामाक्षि नृत्यतु मयि त्वदपाङ्गपातः॥ २८ ॥ ४-१६

अत्यन्त-शीतलमतन्द्रयतु क्षणार्धम्
अस्तोक-विभ्रममनङ्गविलासकन्दम्।
अल्प-स्मितादृतमपारकृपाप्रवाहम्
अक्षि-प्ररोहमचिरान्मयि कामकोटि॥ २९ ॥ ४-२४

मातः क्षणं स्नपय मां तव वीक्षितेन
मन्दाक्षितेन सुजनैरपरोक्षितेन।
कामाक्षि कर्म-तिमिरोत्कर-भास्करेण
श्रेयस्करेण मधुप-द्युति-तस्करेण॥ ३० ॥ ४-४५

कैवल्यदाय करुणारसकिङ्कराय
कामाक्षि कन्दलितविभ्रमशङ्कराय।
आलोकनाय तव भक्तशिवङ्कराय
मातर्नमोऽस्तु परतन्त्रितशङ्कराय॥ ३१ ॥ ४-४७

संसारघर्मपरितापजुषां नराणाम्
कामाक्षि शीतलतराणि तवेक्षितानि।
चन्द्रातपन्ति घनचन्दनकर्दमन्ति
मुक्तागुणन्ति हिमवारिनिषेचनन्ति॥ ३२ ॥ ४-७७

बाणेन पुष्पधनुषः परिकल्प्यमान-
त्राणेन भक्तमनसां करुणाकरेण।
कोणेन कोमलदृशस्तव कामकोटि
शोणेन शोषय शिवे मम शोकसिन्धुम्॥ ३३ ॥ ४-९४

अज्ञातभक्तिरसमप्रसरद्विवेकम्
अत्यन्तगर्वमनधीतसमस्तशास्त्रम् ।
अप्राप्तसत्यमसमीपगतं च मुक्तेः
कामाक्षि मामवतु ते करुणाकटाक्षः॥ ३४ ॥ ४-१००

## ॥ ५-मन्दस्मितशतके ॥

कर्पूरैरमृतैर्जगज्जननि ते कामाक्षि चन्द्रातपैः
मुक्ताहारगुणैर्मृणालवलयैर्मुग्धस्मितश्रीरियम् ।
श्रीकाञ्चीपुरनायिके समतया संस्तूयते सज्जनैः
तत्तादृङ्मम तापशान्तिविधये किं देवि मन्दायते॥ ३५ ॥ ५-२४

चेतः शीतलयन्तु नः पशुपतेरानन्दजीवातवो
नम्राणां नयनाध्वसीमसु शरच्चन्द्रातपोपक्रमाः।
संसाराख्यसरोरुहाकरखलीकारे तुषारोत्कराः
कामाक्षि स्मरकीर्तिबीजनिकरास्त्वन्मन्दहासाङ्कुराः॥ ३६ ॥ ५-३१

सूतिः श्वेतिमकन्दलस्य वसतिः शृङ्गारसारश्रियः
पूर्तिः सूक्तिझरीरसस्य लहरी कारुण्यपाथोनिधेः।
वाटी काचन कौसुमी मधुरिमस्वाराज्यलक्ष्म्यास्तव
श्रीकामाक्षि ममास्तु मङ्गलकरी हासप्रभाचातुरी॥ ३७ ॥ ५-८५

इन्धाने भववीतिहोत्रनिवहे कर्मौघचण्डानिल-
प्रौढिम्ना बहुलीकृते निपतितं सन्तापचिन्ताकुलम्।
मातर्मां परिषिञ्च किञ्चिदमलैः पीयूषवर्षैरिव
श्रीकामाक्षि तव स्मितद्युतिकणैः शैशिर्यलीलाकरैः॥ ३८ ॥ ५-९४

क्रीडालोलकृपासरोरुहमुखीसौधाङ्गणेभ्यः कवि-
श्रेणीवाक्परिपाटिकामृतझरीसूतीगृहेभ्यः शिवे।
निर्वाणाङ्कुरसार्वभौमपदवीसिंहासनेभ्यस्तव
श्रीकामाक्षि मनोज्ञमन्दहसितज्योतिष्कणेभ्यो नमः॥ ३९ ॥ ५-१००

आर्यामेव विभावयन् मनसि यः पादारविन्दं पुरः
पश्यन्नारभते स्तुतिं स नियतं लब्ध्वा कटाक्ष-च्छविम्।
कामाक्ष्या मृदुल-स्मितांशु-लहरी-ज्योत्स्ना-वयस्यान्वितम्
आरोहत्यपवर्ग-सौध-वलभीमानन्द-वीची-मयीम् ॥४०॥ ५-१०१

॥ इति श्री-काञ्चीजगद्गुरु-श्री-चन्द्रशेखरेन्द्रसरस्वती-श्रीचरणैः श्री-मूकमहाकविप्रणीतायाः मूकपञ्चशत्याः सङ्गृहीतः मूकसारः सम्पूर्णः ॥

❁

This stotra can be accessed in multiple scripts at:
http://stotrasamhita.net/wiki/Muka_Sarah.

generated on **May 9, 2026**

Downloaded from http://stotrasamhita.github.io | StotraSamhita | Credits